# Shri Gopala Sahasranamastotram 2

# શ્રીગોપાલસહસ્રનામસ્તોત્રમ્ ૨ અથવા બાલકૃષ્ણસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : gopAlasahasranAmastotram 2

File name : gopAlasahasranAmastotra2.itx

Category : sahasranAma, vishhnu, krishna, vishnu

Location : doc_vishhnu

Transliterated by : DPD, help from Alex

Proofread by : DPD, NA

Description-comments : jnAnAmRitasAre chaturtharAtre aShTamo.adhyAyaH

Latest update : February 19. 2015, July 3, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીગોપાલસહસ્રનામસ્તોત્રમ્ ૨ અથવા બાલકૃષ્ણસહસ્રનામસ્તોત્રમ્

નારદપઞ્ચરાત્રે જ્ઞાનામૃતસારે ચતુર્થરાત્રે અષ્ટમોઽધ્યાયઃ

શ્રીપાર્વત્યુવાચ ।
ભગવન્ સર્વદેવેશ ! દેવદેવ ! જગદ્ગુરો ।
કથિતં કવચં દિવ્યં બાલગોપાલરૂપિણમ્ ॥ ૧॥

શ્રુતં મયા તવ મુખાત્ પરં કૌતૂહલં મમ ।
ઇદાનીં શ્રોતુમિચ્છામિ ગોપાલસ્ય પરમાત્મનઃ ॥ ૨॥

સહસ્રં નામ્નાં દિવ્યાનામશેષેણાનુકીર્ત્તય ।
તમેવ શરણં નાથ ત્રાહિ માં ભક્તવત્સલ ॥ ૩॥

યદિ સ્નેહોઽસ્તિ દેવેશ માં પ્રતિ પ્રાણવલ્લભ ।
કેન પ્રકાશિતં પૂર્વં કુત્ર કિં વા કદા ક્વ નુ ॥ ૩॥

પિબતોઽચ્યુતપીયૂષં ન મેઽત્રાસ્તિ નિરામતા ॥ ૪॥

શ્રીમહાદેવ ઉવાચ ।
શ્રીબાલકૃષ્ણસ્ય સહસ્રનામ્નઃ
સ્તોત્રસ્ય કલ્પાખ્યસુરદ્રુમસ્ય ।
વ્યાસો વદત્યખિલશાસ્ત્રનિદેશકર્તા
શ‍ૃણ્વન્ શુકં મુનિગણેષુ સુરર્ષિવર્યઃ ॥ ૫॥

પુરા મહર્ષયઃ સર્વે નારદં દણ્ડકે વને
જિજ્ઞાસાન્તિ સ્મ ભક્ત્યા ચ ગોપાલસ્ય પરાત્મનઃ ॥ ૬॥

નામ્નઃ સહસ્રં પરમં શ‍ૃણુ દેવિ ! સમાસતઃ ।
શ્રુત્વા શ્રીબાલકૃષ્ણસ્ય નામ્નઃ સાહસ્રકં પ્રિયે ॥ ૭॥

વ્યપૈતિ સર્વપાપાનિ બ્રહ્મહત્યાદિકાનિ ચ ।
કલૌ બાલેશ્વરો દેવઃ કલૌ વૃન્દાવનં વનમ્ ॥ ૮॥

કલૌ ગઙ્ગૌ મુક્તિદાત્રી કલૌ ગીતા પરાગતિઃ ।
નાસ્તિ યજ્ઞાદિકાર્યાણિ હરેર્નામૈવ કેવલમ્ ।
કલૌ વિમુક્તયે નૃણાં નાસ્ત્યેવ ગતિરન્યથા ॥ ૯॥

વિનિયોગઃ -
અસ્ય શ્રીબાલકૃષ્ણસ્ય સહસ્રનામસ્તોત્રસ્ય નારદ ઋષિઃ
શ્રીબાલકૃષ્ણો દેવતા પુરુષાર્થસિદ્ધયે જપે વિનિયોગઃ ।

બાલકૃષ્ણઃ સુરાધીશો ભૂતાવાસો વ્રજેશ્વરઃ ।
વ્રજેન્દ્રનન્દનો નન્દી વ્રજાઙ્ગનવિહારણઃ ॥ ૧૦॥

ગોગોપગોપિકાનન્દકારકો ભક્તિવર્ધનઃ ।
ગોવત્સપુચ્છસઙ્કર્ષજાતાનન્દભરોઽજયઃ ॥ ૧૧॥

રિઙ્ગમાણગતિઃ શ્રીમાનતિભક્તિપ્રકાશનઃ ।
ધૂલિધૂસર સર્વાઙ્ગો ઘટીપીતપરિચ્છદઃ ॥ ૧૨॥

પુરટાભરણઃ શ્રીશો ગતિર્ગતિમતાં સદા ।
યોગીશો યોગવન્દ્યાશ્ચ યોગાધીશો યશઃપ્રદઃ ॥ ૧૩॥

યશોદાનન્દનઃ કૃષ્ણો ગોવત્સપરિચારકઃ ।
ગવેન્દ્રશ્ચ ગવાક્ષશ્ચ ગવાધ્યક્ષો ગવાં ગતિ ॥ ૧૪॥

ગવેશશ્ચ ગવીશશ્ચ ગોચારણપરાયણઃ ।
ગોધૂલિધામપ્રિયકો ગોધૂલિકૃતભૂષણઃ ॥ ૧૫॥

ગોરાસ્યો ગોરસાશોગો ગોરસાઞ્ચિતધામકઃ ।
ગોરસાસ્વાદકો વૈદ્યો વેદાતીતો વસુપ્રદઃ ॥ ૧૬॥

વિપુલાંશો રિપુહરો વિક્ષરો જયદો જયઃ ।
જગદ્વન્દ્યો જગન્નાથો જગદારાધ્યપાદકઃ ॥ ૧૭॥

જગદીશો જગત્કર્તા જગત્પૂજ્યો જયારિહા ।
જયતાં જયશીલશ્ચ જયાતીતો જગદ્બલઃ ॥ ૧૮॥

જગદ્ધર્તા પાલયિતા પાતા ધાતા મહેશ્વરઃ ।
રાધિકાનન્દનો રાધાપ્રાણનાથો રસપ્રદઃ ॥ ૧૯॥

રાધાભક્તિકરઃ શુદ્ધો રાધારાધ્યો રમાપ્રિયઃ ।
ગોકુલાનન્દદાતા ચ ગોકુલાનન્દરૂપધૃક્ ॥ ૨૦॥

ગોકુલેશ્વરકલ્યાણો ગોકુલેશ્વરનન્દનઃ ।
ગોલોકાભિરિતિઃ સ્રગ્વી ગોલોકેશ્વરનાયકઃ ॥ ૨૧॥

નિત્યં ગોલોકવસતિર્નિત્યં ગોગોપનન્દનઃ ।
ગણેશ્વરો ગણાધ્યક્ષો ગણાનાં પરિપૂરકઃ ॥ ૨૨॥

ગુણા ગુણોત્કરો ગણ્યો ગુણાતીતૌ ગુણાકરઃ ।
ગુણપ્રિયો ગુણાધારો ગુણારાધ્યો ગણાગ્રણી ॥ ૨૩॥

ગણનાયકો વિઘ્નહરો હેરમ્બઃ પાર્વતીસુતઃ ।
પર્વતાધિનિવાસી ચ ગોવર્ધનધરો ગુરુઃ ॥ ૨૪॥

ગોવર્ધનપતિઃ શાન્તો ગોવર્ધનવિહારકઃ ।
ગોવર્ધનો ગીતગતિર્ગવાક્ષો ગોવૃક્ષેક્ષણઃ ॥ ૨૫॥

ગભસ્તિનેમિર્ગીતાત્મા ગીતગમ્યો ગતિપ્રદઃ ।
ગવામયો યજ્ઞનેમિર્યજ્ઞાઙ્ગો યજ્ઞરૂપધૃક્ ॥ ૨૬॥

યજ્ઞપ્રિયો યજ્ઞહર્તા યજ્ઞગમ્યો યજુર્ગતિઃ ।
યજ્ઞાઙ્ગો યજ્ઞગમ્યશ્ચ યજ્ઞપ્રાપ્યો વિમત્સરઃ ॥ ૨૭॥

યજ્ઞાન્તકૃત્ યજ્ઞગુણો યજ્ઞાતીતો યજુઃપ્રિયઃ ।
મનુર્મન્વાદિરૂપી ચ મન્વન્તરવિહારકઃ ॥ ૨૮॥

મનુપ્રિયો મનોર્વંશધારી માધવમાપતિઃ ।
માયાપ્રિયો મહામાયો માયાતીતો મયાન્તકઃ ॥ ૨૯॥

માયાભિગામી માયાખ્યો મહામાયાવરપ્રદઃ ।
મહામાયાપ્રદો માયાનન્દો માયેશ્વરઃ કવિઃ ॥ ૩૦॥

કરણં કારણં કર્તા કાર્યં કર્મ ક્રિયા મતિઃ ।
કાર્યાતીતો ગવાં નાથો જગન્નાથો ગુણાકરઃ ॥ ૩૧॥

વિશ્વરૂપો વિરૂપાખ્યો વિદ્યાનન્દો વસુપ્રદઃ ।
વાસુદેવો વિશિષ્ટેશો વાણીશો વાક્પતિર્મહઃ ॥ ૩૨॥

વાસુદેવો વસુશ્રેષ્ઠો દેવકીનન્દનોઽરિહા
વસુપાતા વસુપતિર્વસુધાપરિપાલકઃ ॥ ૩૩॥

કંસારિઃ કંસહન્તા ચ કંસારાધ્યો ગતિર્ગવામ્ ।
ગોવિન્દો ગોમતાં પાલો ગોપનારીજનાધિપઃ ॥ ૩૪॥

ગોપીરતો રુરુનખધારી હારી જગદ્ગુરુઃ ।
જાનુજઙ્ઘાન્તરાલશ્ચ પીતામ્બરધરો હરિઃ ॥ ૩૫॥

હૈયઙ્ગવીનસમ્ભોક્તા પાયસાશો ગવાં ગુરુઃ ।
બ્રહ્મણ્યો બ્રહ્મણાઽઽરાધ્યોનિત્યં ગોવિપ્રપાલકઃ ॥ ૩૬॥

ભક્તપ્રિયો ભક્તલભ્યો ભક્ત્યાતીતો ભુવાં ગતિઃ ।
ભૂલોકપાતા હર્તા ચ ભૂગોલપરિચિન્તકઃ ॥ ૩૭॥

નિત્યં ભૂલોકવાસી ચ જનલોકનિવાસકઃ ।
તપોલોકનિવાસી ચ વૈકુણ્ઠો વિષ્ટસસ્રવાઃ ॥ ૩૮॥

વિકુણ્ઠવાસી વૈકુણ્ઠવાસી હાસી રસપ્રદઃ ।
રસિકાગોપિકાનન્દદાયકો બાલધૃગ્વપુઃ ॥ ૩૯॥

યશસ્વી યમુનાતીરપુલિનેઽતીવમોહનઃ ।
વસ્ત્રહર્તા ગોપિકાનાં મનોહારી વરપ્રદઃ ॥ ૪૦॥

દધિભક્ષો દયાધારો દાતા પાતા હૃતાહૃતઃ ।
મણ્ડપો મણ્ડલાધીશો રાજરાજેશ્વરો વિભુઃ ॥ ૪૧॥

વિશ્વધૃક્ વિશ્વભુક્ વિશ્વપાલકો વિશ્વમોહનઃ ।
વિદ્વત્પ્રિયો વીતહવ્યો હવ્યગવ્યકૃતાશનઃ ॥ ૪૨॥

કવ્યભુક્ પિતૃવર્તી ચ કાવ્યાત્મા કવ્યભોજનઃ ।
રામો વિરામો રતિદો રતિભર્તા રતિપ્રિયઃ ॥ ૪૩॥

પ્રદ્યુમ્નોઽક્રૂરદમ્યશ્ચ ક્રૂરાત્મા કૂરમર્દનઃ ।
કૃપાલુશ્ચ દયાલુશ્ચ શયાલુઃ સરિતાં પતિઃ ॥ ૪૪॥

નદીનદવિધાતા ચ નદીનદાવિહારકઃ ।
સિન્ધુઃ સિન્ધુપ્રિયોદાન્તઃ શાન્તઃ કાન્તઃ કલાનિધિઃ ॥ ૪૫॥

સંન્યાસકૃત્સતાં ભર્તા સાધૂચ્છિષ્ટકૃતાશનઃ ।
સાધુપ્રિયઃ સાધુગમ્યો સાધ્વાચારનિષેવકઃ ॥ ૪૬॥

જન્મકર્મફલત્યાગી યોગી ભોગી મૃગીપતિઃ ।
માર્ગાતીતો યોગમાર્ગો માર્ગમાણો મહોરવિઃ ॥ ૪૭॥

રવિલોચનો રવેરઙ્ગભાગી દ્વાદશરૂપધૃક્ ।

ગોપાલો બાલગોપાલોબાલકાનન્દદાયકઃ ॥ ૪૮॥

બાલકાનાં પતિઃ શ્રીશો વિરતિઃ સર્વપાપિનામ્ ।
શ્રીલઃ શ્રીમાન્ શ્રીયુતશ્ચ શ્રીનિવાસઃ શ્રિયઃ પતિઃ ॥ ૪૯॥

શ્રીદઃ શ્રીશઃ શ્રિયઃકાન્તો રમાકાન્તો રમેશ્વરઃ ।
શ્રીકાન્તો ધરણીકાન્ત ઉમાકાન્તપ્રિયઃ પ્રભુઃ ॥ ૫૦॥

ઇષ્ટઽભિલાષી વરદો વેદગમ્યો દુરાશયઃ ।
દુઃખહર્તા દુઃખનાશો ભવદુઃખનિવારકઃ ॥ ૫૧॥

યથેચ્છાચારનિરતો યથેચ્છાચારસુરપ્રિયઃ ।
યથેચ્છાલાભસન્તુષ્ટો યથેચ્છસ્ય મનોઽન્તરઃ ॥ ૫૨॥

નવીનનીરદાભાસો નીલાઞ્જનચયપ્રભઃ ।
નવદુર્દિનમેઘાભો નવમેઘચ્છવિઃ ક્વચિત્ ॥ ૫૩॥

સ્વર્ણવર્ણો ન્યાસધારો દ્વિભુજો બહુબાહુકઃ ।
કિરીટધારી મુકુટી મૂર્તિપઞ્જરસુન્દરઃ ॥ ૫૪॥

મનોરથપથાતીતકારકો ભક્તવત્સલઃ ।
કણ્વાન્નભોક્તા કપિલો કપિશો ગરુડાત્મક ॥ ૫૫॥

સુવર્ણવર્ણો હેમામઃ પૂતનાન્તક ઇત્યાપિઃ ।
પૂતનાસ્તનપાતા ચ પ્રાણાન્તકરણો રિપુઃ ॥ ૫૬॥

વત્સનાશો વત્સપાલો વત્સેશ્વરવસૂત્તમઃ ।
હેમાભો હેમકણ્ઠશ્ચ શ્રીવત્સઃ શ્રીમતાં પતિઃ ॥ ૫૭॥

સનન્દનપથારાધ્યો પાતુર્ધાતુમતાં પતિઃ ।
સનત્કુમારયોગાત્મા સનેકશ્વરરૂપધૃક્ ॥ ૫૮॥

સનાતનપદો દાતા નિત્યં ચૈવ સનાતનઃ ।
ભાણ્ડીરવનવાસી ચ શ્રીવૃન્દાવનનાયકઃ ॥ ૫૯॥

વૃન્દાવનેશ્વરીપૂજ્યો વૃન્દારણ્યવિહારકઃ ।
યમુનાતીરગોધેનુપાલકો મેઘમન્મથઃ ॥ ૬૦॥

કન્દર્પદર્પહરણો મનોનયનનન્દનઃ ।
બાલકેલિપ્રિયઃ કાન્તો બાલક્રીડાપરિચ્છદઃ ॥ ૬૧॥

બાલાનાં રક્ષકો બાલઃ ક્રીડાકૌતુકકારકઃ ।
બાલ્યરૂપધરો ધન્વી ધાનુષ્કી શૂલધૃક્ વિભુઃ ॥ ૬૨॥

અમૃતાંશોઽમૃતવપુઃ પીયૂષપરિપાલકઃ ।
પીયૂષપાયી પૌરવ્યાનન્દનો નન્દિવર્ધનઃ ॥ ૬૩॥

શ્રીદામાંશુકપાતા ચ શ્રીદામપરિભૂષણઃ ।
વૃન્દારણ્યપ્રિયઃ કૃષ્ણઃ કિશોર કાન્તરૂપધૃક્ ॥ ૬૪॥

કામરાજઃ કલાતીતો યોગિનાં પરિચિન્તકઃ ।
વૃષેશ્વરઃ કૃપાપાલો ગાયત્રીગતિવલ્લભઃ ॥ ૬૫॥

નિર્વાણદાયકો મોક્ષદાયી વેદવિભાગકઃ ।
વેદવ્યાસપ્રિયો વૈદ્યો વૈદ્યાનન્દપ્રિયઃ શુભઃ ॥ ૬૬॥

શુકદેવો ગયાનાથો ગયાસુરગતિપ્રદઃ ।
વિષ્ણુર્જિષ્ણુર્ગરિષ્ઠશ્ચ સ્થવિષ્ટાશ્ચ સ્થવીયસામ્ ॥ ૬૭॥

વરિષ્ઠશ્ચ યવિષ્ઠશ્ચ ભૂયિષ્ઠશ્ચ ભુવઃ પતિઃ ।
દુર્ગતેર્નાશકો દુર્ગપાલકો દુષ્ટનાશકઃ ॥ ૬૮॥

કાલીયસર્પદમનો યમુનાનિર્મલોદકઃ ।
યમુનાપુલિને રમ્યે નિર્મલે પાવનોદકે ॥ ૬૯॥

વસન્તુબાલગોપાલરૂપધારી ગિરાં પતિઃ ।
વાગ્દાતા વાક્પ્રદો વાણીનાથો બ્રાહ્મણરક્ષકઃ ॥ ૭૦॥

બ્રહ્મણ્યે બ્રહ્મકૃદ્બ્રહ્મ બ્રહ્મકર્મપ્રદાયકઃ ।
વ્રહ્મણ્યદેવો બ્રહ્મણ્યદાયકો બ્રાહ્મણપ્રિયઃ ॥ ૭૧॥

સ્વસ્તિપ્રિયોઽસ્વસ્થધરોઽસ્વસ્થનાશો ધિયાં પતિઃ ।
ક્વણન્નૂપુરધૃગ્વિશ્વરૂપી વિશ્વેશ્વરઃ શિવઃ ॥ ૭૨॥

શિવાત્મકો બાલ્યવપુઃ શિવાત્મા શિવરૂપધૃક્ ।
સદાશિવપ્રિયો દેવઃ શિવવન્દ્યો જગત્શિવઃ ॥ ૭૩॥

ગોમધ્યવાસી ગોવાસી ગોપગોપીમનોઽન્તરઃ ।
ધર્મો ધર્મધુરીણશ્ચ ધર્મરૂપો ધરાધરઃ ॥ ૭૪॥

સ્વોપાર્જિતયશાઃ કીર્તિવર્ધનો નન્દિરૂપકઃ ।
દેવહૂતિજ્ઞાનદાતા યોગસાઙ્ખ્યનિવર્તકઃ ॥ ૭૫॥

તૃણાવર્તપ્રાણહારી શકટાસુરભઞ્જનઃ ।
પ્રલમ્બહારી રિપુહા તથા ધેનુકમર્દનઃ ॥ ૭૬॥

અરિષ્ટાનાશનોઽચિન્ત્યઃ કેશિહા કેશિનાશનઃ ।
કઙ્કુહા કંસહા કંસનાશનો રિપુનાશનઃ ॥ ૭૭॥

યમુનાજલકલ્લોલદર્શી હર્ષી પ્રિયંવદઃ ।
સ્વચ્છન્દહારી યમુનાજલહારી સુરપ્રિયઃ ॥ ૭૮॥

લીલાધૃતવપુઃ કેલિકારકો ધરણીધરઃ ।
ગોપ્તા ગરિષ્ઠો ગદિદો ગતિકારી ગયેશ્વરઃ ॥ ૭૯॥

શોભાપ્રિયઃ શુભકરો વિપુલશ્રીપ્રતાપનઃ ।
કેશિદૈત્યહરો દાત્રી દાતા ધર્માર્થસાધન ॥ ૮૦॥

ત્રિસામા ત્રિકકૃત્સામઃ સર્વાત્મા સર્વદીપનઃ ।
સર્વજ્ઞઃ સુગતો બુદ્ધો બૌદ્ધરૂપી જનાર્દનઃ ॥ ૮૧॥

દૈત્યારિઃ પુણ્ડરીકાક્ષઃ પદ્મનાભોઽચ્યુતોઽસિતઃ ।
પદ્માક્ષઃ પદ્મજાકાન્તો ગરુડાસનવિગ્રહઃ ॥ ૮૨॥

ગારુત્મતધરો ધેનુપાલકઃ સુપ્તવિગ્રહઃ ।
આર્તિહા પાપહાનેહા ભૂતિહા ભૂતિવર્ધનઃ ॥ ૮૩॥

વાઞ્છાકલ્પદ્રુમઃ સાક્ષાન્મેધાવી ગરુડધ્વજઃ ।
નીલશ્વેતઃ સિતઃ કૃષ્ણો ગૌરઃ પીતામ્બરચ્છદઃ ॥ ૮૪॥

ભક્તાર્તિનાશનો ગીર્ણઃ શીર્ણો જીર્ણતનુચ્છદઃ ।
બલિપ્રિયો બલિહરો બલિબન્ધનતત્પરઃ ॥ ૮૫॥

વામનો વામદેવશ્ચ દૈત્યારિઃ કઞ્જલોચનઃ ।
ઉદીર્ણઃ સર્વતો ગોપ્તા યોગગમ્યઃ પુરાતનઃ ॥ ૮૬ ॥

નારાયણો નરવપુઃ કૃષ્ણાર્જુનવપુર્ધરઃ ।
ત્રિનાભિસ્ત્રિવૃતાં સેવ્યો યુગાતીતો યુગાત્મકઃ ॥ ૮૭॥

હંસો હંસી હંસવપુર્હંસરૂપી કૃપામયઃ ।
હરાત્મકો હરવપુર્હરભાવનતત્પરઃ ॥ ૮૮॥

ધર્મરાગો યમવપુસ્ત્રિપુરાન્તકવિગ્રહઃ ।

યુધિષ્ઠિરપ્રિયો રાજ્યદાતા રાજેન્દ્રવિગ્રહઃ ॥ ૮૯॥

ઇન્દ્રયજ્ઞહરો ગોવર્ધનધારી ગિરાં પતિઃ ।
યજ્ઞભુગ્યજ્ઞકારી ચ હિતકારી હિતાન્તકઃ ॥ ૯૦॥

અક્રૂરવન્દ્યો વિશ્વધ્રુગશ્વહારી હયાસ્યકઃ ।
હયગ્રીવઃ સ્મિતમુખો ગોપીકાન્તોઽરુણધ્વધઃ ॥ ૯૧॥

નિરસ્તસામ્યાતિશયઃ સર્વાત્મા સર્વમણ્ડનઃ ।
ગોપીપ્રીતિકરો ગોપીમનોહારી હરિર્હરિઃ ॥ ૯૨॥

લક્ષ્મણો ભરતો રામઃ શત્રુઘ્નો નીલરૂપકઃ ।
હનૂમજ્જ્ઞાનદાતા ચ જાનકીવલ્લભો ગિરિઃ ॥ ૯૩॥

ગિરિરૂપો ગિરિમખો ગિરિયજ્ઞપ્રવર્ત્તકઃ ॥ ૯૪॥

ભવાબ્ધિપોતઃ શુભકૃચ્છુભભુક્ શુભવર્ધનઃ ।
વારારોહી હરિમુખો મણ્ડૂકગતિલાલસઃ ॥ ૯૫॥

નેત્રવદ્ધક્રિયો ગોપબાલકો બાલકો ગુણઃ ।
ગુણાર્ણવપ્રિયો ભૂતનાથો ભૂતાત્મકશ્ચ સઃ ॥ ૯૬॥

ઇન્દ્રજિદ્ભયદાતા ચ યજુષાં પરિરપ્પતિઃ ।
ગીર્વાણવન્દ્યો ગીર્વાણગતિરિષ્ટોગુરુર્ગતિઃ ॥ ૯૭॥

ચતુર્મુખસ્તુતિમુખો બ્રહ્મનારદસેવિતઃ ।
ઉમાકાન્તધિયાઽઽરાધ્યો ગણનાગુણસીમકઃ ॥ ૯૮॥

સીમાન્તમાર્ગો ગણિકાગણમણ્ડલસેવિતઃ ।
ગોપીદૃક્પદ્મમધુપો ગોપીદૃઙ્મણ્ડલેશ્વરઃ ॥ ૯૯॥

ગોપ્યાલિઙ્ગનકૃદ્ગોપીહૃદયાનન્દકારકઃ ।
મયૂરપિચ્છશિખરઃ કઙ્કણાઙ્ગદભૂષણઃ ॥ ૧૦૦॥

સ્વર્ણચમ્પકસન્દોલઃ સ્વર્ણનૂપુરભૂષણઃ ।
સ્વર્ણતાટઙ્કકર્ણશ્ચ સ્વર્ણચમ્પકભૂષિતઃ ॥ ૧૦૧॥

ચૂડાગ્રાર્પિતરત્નેન્દ્રસારઃ સ્વર્ણામ્બરચ્છદઃ ।
આજાનુબાહુઃ સુમુખો જગજ્જનનતત્પરઃ ॥ ૧૦૨॥

બાલક્રીડાઽતિચપલો ભાણ્ડીરવનનન્દનઃ ।

મહાશાલઃ શ્રુતિમુખો ગઙ્ગાચરણસેવનઃ ॥ ૧૦૩॥

ગઙ્ગામ્બુપાદઃ કરજાકરતોયાજલેશ્વરઃ ।
ગણ્ડકીતીરસમ્ભૂતો ગણ્ડકીજલમર્દનઃ ॥ ૧૦૪॥

શાલગ્રામઃ શાલરૂપી શશિભૂષણભૂષણઃ ।
શશિપાદઃ શશિનખો વરાર્હો યુવતીપ્રિયઃ ॥ ૧૦૫॥

પ્રેમપદઃ પ્રેમલભ્યો ભક્ત્યાતીતો ભવપ્રદઃ ।
અનન્તશાયી શવકૃચ્છયનો યોગિનીશ્વરઃ ॥ ૧૦૬॥

પૂતનાશકુનિપ્રાણહારકો ભવપાલકઃ ।
સર્વલક્ષણલક્ષણ્યો લક્ષ્મીમાન્ લક્ષ્મણાગ્રજઃ ॥ ૧૦૭॥

સર્વાન્તકૃત્સર્વગુહ્ય સર્વાતીતોઽઽસુરાન્તકઃ ।
પ્રાતરાશનસમ્પૂર્ણો ધરણીરેણુગુણ્ઠિતઃ ॥ ૧૦૮॥

ઇજ્યો મહેજ્ય સર્વેજ્ય ઇજ્યરૂપીજ્યભોજનઃ ।
બ્રહ્માર્પણપરો નિત્યં બ્રહ્માગ્નિપ્રીતિલાલસઃ ॥ ૧૦૯॥

મદનો મદનારાધ્યો મનોમથનરૂપકઃ ।
નીલાઞ્ચિતાકુઞ્ચિતકો બાલવૃન્દવિભૂષિતઃ ॥ ૧૧૦॥

સ્તોકક્રીડાપરો નિત્યં સ્તોકભોજનતત્પરઃ ।
લલિતાવિશખાશ્યામલતાવન્દિપાદકઃ ॥ ૧૧૧॥

શ્રીમતીપ્રિયકારી ચ શ્રીમત્યા પાદપૂજિતઃ ।
શ્રીસંસેવિતપાદાબ્જો વેણુવાદ્યવિશારદઃ ॥ ૧૧૨॥

શ‍ૃઙ્ગવેત્રકરો નિત્યં શ‍ૃઙ્ગવાદ્યપ્રિયઃ સદા ।
બલરામાનુજઃ શ્રીમાન્ ગજેન્દ્રસ્તુતપાદકઃ ॥ ૧૧૩॥

હલાયધુઃ પીતવાસા નીલામ્બરપરિચ્છદઃ ।
ગજેન્દ્રવક્ત્રો હેરમ્બો લલનાકુલપાલકઃ ॥ ૧૧૪॥

રાસક્રીડાવિનોદશ્ચ ગોપીનયનહારકઃ ।
બલપ્રદો વીતભયો ભક્તાર્તિપરિનાશનઃ ॥ ૧૧૫॥

ભક્તિપ્રિયો ભક્તિદાતા દામોદર ઇભસ્પતિઃ ।
ઇન્દ્રદર્પહરોઽનન્તો નિત્યાનન્દશ્ચિદાત્મકઃ ॥ ૧૧૬॥

ચૈતન્યરૂપશ્ચૈતન્યશ્ચેતનાગુણવર્જિતઃ ।
અદ્વૈતાચારનિપુણોઽદ્વૈતઃ પરમનાયકઃ ॥ ૧૧૭॥

શિવભક્તિપ્રદો ભક્તો ભક્તાનામન્તરાશયઃ ।
વિદ્વત્તમો દુર્ગતિહા પુણ્યાત્મા પુણ્યપાલકઃ ॥ ૧૧૮॥

જ્યેષ્ઠઃ શ્રેષ્ઠઃ કનિષ્ઠશ્ચ નિષ્ઠોઽતિષ્ઠ ઉમાપતિઃ ।
સુરેન્દ્રવન્દ્યચરણો ગોત્રહા ગોત્રવર્જિતઃ ॥ ૧૧૯॥

નારાયણપ્રિયો નારશાયી નારદસેવિતઃ ।
ગોપાલબાલસંસેવ્યઃ સદાનિર્મલમાનસઃ ॥ ૧૨૦॥

મનુમન્ત્રો મન્ત્રપતિર્ધાતા ધામવિવર્જિતઃ ।
ધરાપ્રદો ધૃતિગુણો યોગીન્દ્ર કલ્પપાદપઃ ॥ ૧૨૧॥

અચિન્ત્યાતિશયાનન્દરૂપી પાણ્ડવપૂજિતઃ ।
શિશુપાલપ્રાણહારી દન્તવક્રનિસૂદનઃ ॥ ૧૨૨॥

અનાદિશાદિપુરુષો ગોત્રી ગાત્રવિવર્જિતઃ ।
સર્વાપત્તારકોદુર્ગો દૃષ્ટદૈત્યકુલાન્તકઃ ॥ ૧૨૩॥

નિરન્તરઃ શુચિમુખો નિકુમ્ભકુલદીપનઃ ।
ભાનુર્હનૂર્દ્ધનુઃ સ્થાણુઃ કૃશાનુઃ કૃતનુર્ધનુઃ ॥ ૧૨૪॥

અનુર્જન્માદિરહિતો જાતિગોત્રવિવર્જિતઃ ।
દાવાનલનિહન્તા ચ દનુજારિર્બકાપહા ॥ ૧૨૫॥

પ્રહ્લાદભક્તો ભક્તેષ્ટદાતા દાનવગોત્રહા ।
સુરભિર્દુગ્ધયો દુગ્ધહારી શૌરિઃ શુચાં હરિઃ ॥ ૧૨૬॥

યથેષ્ટદોઽતિસુલભઃ સર્વજ્ઞઃ સર્વતોમુખઃ ।
દૈત્યારિઃ કૈટભારિશ્ચ કંસારિઃ સર્વતાપનઃ ॥ ૧૨૭॥

દ્વિભુજઃ ષડ્ભુજો હ્યન્તર્ભુજો માતલિસારથિઃ ।
શેષઃ શેષાધિનાથશ્ચ શેષી શેશાન્તવિગ્રહઃ ॥ ૧૨૮॥

કેતુર્ધરિત્રીચારિત્રશ્ચતુર્મૂર્તિશ્ચતુર્ગતિઃ ।
ચતુર્ધા ચતુરાત્મા ચ ચતુર્વર્ગપ્રદાયકઃ ॥ ૧૨૯॥

કન્દર્પદર્પહારી ચ નિત્યઃ સર્વાઙ્ગસુન્દરઃ ।
શચીપતિપતિર્નેતા દાતા મોક્ષગુરુર્દ્વિજઃ ॥ ૧૩૦॥

હૃતસ્વનાથોઽનાથસ્ય નાથઃ શ્રીગરુડાસનઃ ।
શ્રીધરઃ શ્રીકરઃ શ્રેયઃ પતિર્ગતિરપાં પતિઃ ॥ ૧૩૧॥

અશેષવન્દ્યો ગીતાત્મા ગીતાગાનપરાયણઃ ।
ગાયત્રીધામશુભદો વેલામોદપરાયણઃ ॥ ૧૩૨॥

ધનાધિપઃ કુલપતિર્વસુદેવાત્મજોઽરિહા ।
અજૈકપાત્ સહસ્રાક્ષો નિત્યાત્મા નિત્યવિગ્રહઃ ॥ ૧૩૩॥

નિત્યઃ સર્વગતઃ સ્થાણુરજોઽગ્નિર્ગિરિનાયકઃ ।
ગોનાયકઃ શોકહન્તાઃ કામારિઃ કામદીપનઃ ॥ ૧૩૪॥

વિજિતાત્મા વિધેયાત્મા સોમાત્મા સોમવિગ્રહઃ ।
ગ્રહરૂપી ગ્રહાધ્યક્ષો ગ્રહમર્દનકારકઃ ॥ ૧૩૫॥

વૈખાનસઃ પુણ્યજનો જગદાદિર્જગત્પતિઃ ।
નીલેન્દીવરભો નીલવપુઃ કામાઙ્ગનાશનઃ ॥ ૧૩૬॥

કામવીજાન્વિતઃ સ્થૂલઃ કૃશઃ કૃશતનુર્નિજઃ ।
નૈગમેયોઽગ્નિપુત્રશ્ચ ષાણમાતુરઃ ઉમાપતિઃ ॥ ૧૩૭॥

મણ્ડૂકવેશાધ્યક્ષશ્ચ તથા નકુલનાશનઃ ।
સિંહો હરીન્દ્રઃ કેશીન્દ્રહન્તા તાપનિવારણઃ ॥ ૧૩૮॥

ગિરીન્દ્રજાપાદસેવ્યઃ સદા નિર્મલમાનસઃ ।
સદાશિવપ્રિયો દેવઃ શિવઃ સર્વ ઉમાપતિઃ ॥ ૧૩૯॥

શિવભક્તો ગિરામાદિઃ શિવારાધ્યો જગદ્ગુરૂઃ ।
શિવપ્રિયો નીલકણ્ઠઃ શિતિકણ્ઠઃ ઉષાપતિઃ ॥ ૧૪૦॥

પ્રદ્યુમ્નપુત્રો નિશઠઃ શઠઃ શઠધનાપહા ।
ધૂપાપ્રિયો ધૂપદાતા ગુગ્ગુલ્વગુરુધૂપિતઃ ॥ ૧૪૧॥

નીલામ્બરઃ પીતવાસા રક્તશ્વેતપરિચ્છદઃ ।
નિશાપતિર્દિવાનાથો દેવબ્રાહ્મણપાલકઃ ॥ ૧૪૨॥

ઉમાપ્રિયો યોગિમનોહારી હારવિભૂષિતઃ ।
ખગેન્દ્રવન્દ્યપાદાબ્જઃ સેવાતપપરાઙ્મુખઃ ॥ ૧૪૩॥

પરાર્થદોઽપરપતિઃ પરાત્પરતરો ગુરુઃ ।

સેવાપ્રિયો નિર્ગુણશ્ચ સગુણઃ શ્રુતિસુન્દરઃ ॥ ૧૪૪॥

દેવાધિદેવો દેવેશો દેવપૂજ્યો દિવાપતિઃ ।
દિવઃ પતિર્વૃહદ્ભાનુઃ સેવિતેપ્સિતદાયકઃ ॥ ૧૪૫॥

ગોતમાશ્રમવાસી ચ ગોતમશ્રીનિષેવિતઃ ।
રક્તામ્બરધરો દિવ્યો દેવીપાદાબ્જપૂજિતઃ ॥ ૧૪૬॥

સેવિતાર્થપ્રદાતા ચ સેવાસેવ્યગિરીન્દ્રજઃ ।
ધાતુર્મનોવિહારી ચ વિધીતા ધાતુરુત્તમઃ ॥ ૧૪૭॥

અજ્ઞાનહન્તા જ્ઞાનેન્દ્રવન્દ્યો વન્દ્યધનાધિપઃ ।
અપાં પતિર્જલનિધિર્ધરાપતિરશેષકઃ ॥ ૧૪૮॥

દેવેન્દ્રવન્દ્યો લોકાત્મા ત્રિલોકાત્મા ત્રિલોકપાત્ ।
ગોપાલદાયકો ગન્ધદ્રદો ગુહ્યકસેવિતઃ ॥ ૧૪૯॥

નિર્ગુણઃ પુરુષાતીતઃ પ્રકૃતેઃ પર ઉજ્જ્વલઃ ।
કાર્તિકેયોઽમૃતાહર્તા નાગારિર્નાગહારકઃ ॥ ૧૫૦॥

નાગેન્દ્રશાયી ધરણીપતિરાદિત્યરૂપકઃ ।
યશસ્વી વિગતાશી ચ કુરુક્ષેત્રાધિપઃ શશી ॥ ૧૫૧॥

શશકારિ શુભચારો ગીર્વાણગણસેવિતઃ ।
ગતિપ્રદો નરસખઃ શીતલાત્મા યશઃ પતિઃ ॥ ૧૫૨॥

વિજિતારિર્ગણાધ્યક્ષો યોગાત્મા યોગપાલકઃ ।
દેવેન્દ્રસેવ્યો દેવન્દ્રપાપહારી યશોધનઃ ॥ ૧૫૩॥

અકિઞ્ચનધનઃ શ્રીમાનમેયાત્મા મહાદ્રિધૃક્ ।
મહાપ્રલયકારી ચ શચીસુતજયપ્રદઃ ॥ ૧૫૪॥

જનેશ્વરઃ સર્વવિધિરૂપી બ્રાહ્મણપાલકઃ ।
સિંહાસનનિવાસી ચ ચેતનારહિતઃ શિવઃ ॥ ૧૫૫॥

શિવપ્રદો દક્ષયજ્ઞહન્તા ભૃગુનિવારકઃ ।
વીરભદ્રભયાવર્તઃ કાલઃ પરમનિર્વ્રણઃ ॥ ૧૫૬॥

ઉદૂખલનિબદ્ધશ્ચ શોકાત્મા શોકનાશનઃ ।
આત્મયોનિષ સ્વયઞ્જાતો વૈખાનઃ પાપહારકઃ ॥ ૧૫૭॥

કીર્તિપ્રદઃ કીર્તિદાતા ગજેન્દ્રભુજપૂજિતઃ ।
સર્વાન્તરાત્મા સર્વાત્મા મોક્ષરૂપી નિરાયુધઃ ॥ ૧૫૮॥

ઉદ્ધવજ્ઞાનદાતા ચ યમલાર્જુનભઞ્જનઃ ।

ફલશ્રુતિઃ ।
ઇત્યેતત્કથિતં દેવી સહસ્રં નામ ચોત્તમમ્ ॥ ૧૫૯॥

આદિદેવસ્ય વૈ વિષ્ણોર્બાલકત્વમુપેયુષઃ ।
યઃ પઠેત્ પાઠયેદ્વાપિ શ્રુણયાત્ શ્રાવયીત વા ॥ ૧૬૦॥

કિં ફલં લભતે દેવિ વક્તું નાસ્તિ મમ પ્રિયે ।
શક્તિર્ગોપાલનામ્જશ્ચ સહસ્રસ્ય મહેશ્વરિ ॥ ૧૬૧॥

બ્રહ્મહત્યાદિકાનીહ પાપાનિ ચ મહાન્તિ ચ ।
વિલયં યાન્તિ દેવેશિ ! ગોપાલસ્ય પ્રસાદતઃ ॥ ૧૬૨॥

દ્વાદશ્યાં પૌર્ણમાસ્યાં વા સપ્તમ્યાં રવિવાસરે ।
પક્ષદ્વયે ચ સમ્પ્રાપ્ય હરિવાસનમેવ વા ॥ ૧૬૩॥

યઃ પઠેચ્છૃણુયાદ્વાપિ ન જનુસ્તસ્ય વિદ્યતે ।
સત્યં સત્યં મહેશાનિ સત્યં સત્યં ન સંશયઃ ॥ ૧૬૪॥

એકાદશ્યાં શુચિર્ભૂત્વા સેવ્યા ભક્તિર્હરેઃ શુભાઃ ।
શ્રુત્વા નામ સહસ્રાણિ નરો મુચ્યેત પાતકાત્ ॥ ૧૬૫॥

ન શઠાય પ્રદાતવ્યં ન ધર્મધ્વજિને પુનઃ ।
નિન્દકાય ચ વિપ્રાણાં દેવાનાં વૈષ્ણવસ્ય ચ  ॥ ૧૬૬॥

ગુરુભક્તિવિહીનાય શિવદ્વેષરતાય ચ ।
રાધાદુર્ગાભેદમતૌ સત્યં સત્યં ન સંશયઃ ॥ ૧૬૭॥

યદિ નિન્દેન્મહેશાનિ ગુરુહા ભવેદ્ધ્રુવમ્ ।
વૈષ્ણવેષુ ચ શાન્તેષુ નિત્યં વૈરાગ્યરાગિષુ ॥ ૧૬૮॥

બ્રાહ્મણાય વિશુદ્ધાય સન્ધ્યાર્ચનરતાય ચ ।
અદ્વૈતાચારનિરતે શિવભક્તિરતાય ચ ॥ ૧૬૯॥

ગુરુવાક્યરતાયૈવ નિત્યં દેયં મહેશ્વરિ ।
ગોપિતં સર્વતન્ત્રેષુ તવ સ્નેહાત્પ્રકીર્તિતમ્ ॥ ૧૭૦॥

નાતઃ પરતરં સ્તોત્રં નાતઃ પરતરો મનુઃ ।
નાતઃ પરતરો દેવો યુગેષ્વપિ ચતુર્ષ્વપિ ॥ ૧૭૧॥

હરિભક્તેઃ પરા નાસ્તિ મોક્ષશ્રેણી નગેન્દ્રજે ।
વૈષ્ણવેભ્યઃ પરં નાસ્તિ પ્રાણેભ્યોઽપિ પ્રિયા મમ ॥ ૧૭૨॥

વૈષ્ણવેષુ ચ સઙ્ગો મે સદા ભવતુ સુન્દરિ ! ।
યસ્ય વંશે ક્વચિદ્દેવાત્વૈષ્ણવો રાગવર્જિતઃ ॥ ૧૭૩॥

ભવેત્તદ્વંશકે યે યે પૂર્વે સ્યઃ પિતરસ્તથા ।
ભવન્તિ નિર્મલાસ્તે હિ યાન્તિ નિર્વાણતાં હરેઃ ॥ ૧૭૪॥

બહુના કિમિહોક્તેન વૈષ્ણવાનાન્તુ દર્શનાત્ ।
નિર્મલાઃ પાપરહિતાઃ પાપિનઃ સ્યુર્ન સંશયઃ ॥ ૧૭૫॥

કલૌ બાલેશ્વરો દેવઃ કલૌ ગઙ્ગેવ કેવલા ।
કલૌ નાસ્ત્યેવ નાસ્ત્યેવ નાસ્ત્યેવ ગતિરન્યથા ॥ ૧૭૬॥

॥ ઇતિ શ્રીનારદપઞ્ચરાત્રે જ્ઞાનામૃતસારે ચતુર્થરાત્રે
ગોપાલસહસ્રનામસ્તોત્રમષ્ટમોઽધ્યાયઃ ॥

Proofread by DPD, NA

---

*Shri Gopala Sahasranamastotram 2*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*